उत्त 'शिवः + अर्च्यः' इति पदद्वयस्य सन्धिं कृत्वा उदाहरणेन सह लिख्यताम् ?

अतो रोरप्लुतादप्लुते ⇒ ~~अप्लुतादय~~ अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति।

शिवः + अर्च्यः = शिवोऽर्च्यः।

—o—

लोप केन सूत्रेण 'शिवो वन्द्यः' इति सन्धिः सिद्धं भवति?

हशि च ⇒ अप्लुतात् अतः परस्य रोः उत् आदेशः भवति हशि परे।

शिवः + ~~वन्द्य~~ वन्द्यः = शिवो वन्द्यः

—o—

लोप 'भो देवा' इति सन्धिः केन सूत्रेण सिद्धं भवति?

हलि सर्वेषाम् ⇒ भोभगोअघोअपूर्वस्य यस्य लोपः स्यात् हलि। भः + देवाः = भो देवाः

—o—

'स शम्भुः' इति सन्धिः केन सूत्रेण निष्पन्नं भवति?

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ⇒ ~~अकार~~ अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे। सः + शम्भुः = स शम्भुः

सोऽचि लोपे चेत्पादपूरणम् ⇒ '~~सः~~' इत्यस्य सः इत्येतस्य अचि परतः सुलोपः भवति संहितायाम् लोपे सति पादपूरणं ~~च~~ चेत्।

सः + एषः = सैषः

—o—

Teacher Name - Sanchita Chakraborty
Sub - Sanskrit (H), Sem - 4 (CC A4)
TOPIC - Laghusiddhantakaumudi Sandhi Prakaranm (Visarga Sandhi)